International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 220-223
© 2017
www.anantaajournal.com
Received: 25-05-2017
Accepted: 26-06-2017

**JSVN Chandra Sekhara Sarma**
Research Scholar, Dept of Mimamsa, S.V.Vedic University, Tirupati, Andhra Pradesh, India

**Correspondence**
**JSVN Chandra Sekhara Sarma**
Research Scholar, Dept of Mimamsa, S.V.Vedic University, Tirupati, Andhra Pradesh, India

# अर्थवादस्वरूपम् – एकं विवेचनम्

**JSVN Chandra Sekhara Sarma**

## प्रस्तावना

निगमायसुकर्मबोधिने मुनये जैमिनये च सूत्रिणे।
शबरायच भाष्यकारिणे नम ईशाय कुमारिलात्मने।।

**उपोद्घातः**

मीमांसादर्शनं भारतीय आस्तिकदर्शनेषु अन्यतमम् । "मान्" पूजने इत्यस्माध्धातोः निष्पन्नः मीमांसा शब्दः पूज्यविचार–यथार्थवस्तुरूप - अनुसन्धानादिषु अर्थेषु गृह्यते। वेदस्य कर्मसिद्धान्तानुगतव्याख्या मीमांसा दर्शनस्य प्रधानलक्ष्यमस्ति। दर्शनशास्त्रे वेदस्य रूपद्वयं प्रसिद्धमस्ति – कर्मकाण्डः ज्ञानकाण्डश्चेति । ज्ञान काण्डः उत्तरमीमांसाया विषयोऽस्ति, यत्र वेदस्य ज्ञानपरकं विश्लेषणं कृतम् । किन्तु कर्मकाण्डः पूर्वमीमांसायाः विषयो वर्तते, अतः पूर्वमीमांसा एव कर्ममीमांसा इत्यपि कथ्यते ।

मीमांसदर्शने वेदविहितं कर्म एव धर्मरूपेण प्रतिपादितम् । तदेव इहलौकिकानां पारलौकिकानां च सुखानां साधनमस्ति । यदा कर्म एव सुखदुःखयोः मूलकारणं भवति तदा तस्य सूक्ष्मविश्लेषणकारकं शास्त्रं कर्ममीमांसैव उपयुक्तं प्रतीयते । मीमांसादर्शनम् अतिप्राचीनम् अस्ति । ब्राह्मणग्रन्थैः उपनिषद्ग्रन्थैश्च सूचितं भवति यत् प्राक्तनैः ऋषिभिः अनेकेषु अस्पष्टविषयेषु युक्तियुक्ताः विचाराः प्रस्तुताः । ते कर्ममीमांसाया आधारतत्वरूपाः सन्ति ।

मीमांसादर्शनस्य सर्वाधिकं महत्त्वपूर्णं तत्त्वं धर्मविचारोऽस्ति । धर्मस्य आधारशिला कर्मकाण्डम् आधारीकृत्य तिष्ठति । अस्मिन् शास्त्रे धर्मानुष्ठानेनैव अभिमतफलसिद्धिर्भविष्यतीति मतम् । तदनुष्ठानं तु श्रुतिस्मृतिपुराणद्यनेकधर्मग्रन्थेषु प्रसिद्धमस्ति । धर्मस्य लक्षणं किम् ? धर्मे प्रमाणं किम् । इत्यादिशङ्कानां समाधानं पूर्वमीमांसाशास्त्रादेव सिद्धं भवति । एतद् शास्त्रं द्वादशाध्यायेषु विभक्तं भवति भगवता जैमिनिना ।

**तदुक्तं यथा –**

धर्मोद्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः।
अधिकारोतिदेशश्च सामान्येन विशेषतः
ऊहोबाधश्चतन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात्।।[1]

इत्यादिना द्वदशस्वध्यायेषु एकैकस्मिन्नध्याये एकैकः विचारः कृतः। तत्र प्रथमाध्याये प्रमाणविचारः, द्वितीयाध्याये कर्मभेदविचारः, तृतीयाध्याये शेषत्वविचारः, चतुर्थाध्याये प्रयोज्यप्रयोजकभावविचारः, पञ्चमाध्याये अनुष्ठानक्रमविचारः, षष्ठाध्याये अधिकारविचारः, सप्तमाध्याये सामान्यातिदेशविचारः, अष्टमाध्याये विशेषातिदेशविचारः, नवमाध्याये ऊहविचारः, दशमाध्याये बाधविचारः, एकादशाध्याये तन्त्रविचारः, द्वादशाध्याये प्रसङ्गविचारः कृतः।

**धर्मस्वरूपम्**

को नाम धर्मः इति जिज्ञासायं भगवता जैमिनिना "चोदनालक्षणोऽर्थो धर्मः" [2] इत्यनेन सूत्रेण "वेदेनप्रतयोजनमुद्दिश्यविधीयमानोऽर्थो धर्मः" [3] इति धर्मस्वरूपं निरूपितम्। मीमांसकमते धर्मोनाम "यजेतस्वर्गकामः" इत्यादि वाक्यविहित यागादिरेव धर्मः। अधर्मस्तु श्येनयागादिः, यद्यपि श्येनादीनां यागत्वात् धर्मत्वं भवेत् किन्तु अनर्थफलकत्वात् अधर्मत्वमेव। अत एव लक्षणे "अर्थो धर्मः" इति प्रतिपादितम्।

**धर्मावबोधकप्रमाणानि**

भगवान् जैमिनिः धर्मावबोधकानि अष्टौप्रमाणानि निरूपितानि। तानि "विध्यर्थवादमन्त्रस्मृत्याचार-नामधेयवाक्यशेषसामर्थ्य" रूपाणि।

विधिवाक्यानां तावत् धर्मे साक्षात्प्रामाण्यं स्थापितम्। यतो हि अज्ञातार्थज्ञापकत्वात्, "अज्ञातार्थज्ञापकः वेदभागः विधिः" [4] इति यथा - "अग्निहोत्रं जुहोति" [5] इति। विधिरयं चतुर्थाविभागः कृतः। "उत्पत्तिविधि, विनियोगविधि, प्रयोगविधि, अधिकारविधि" रूपेण।

अर्थवादानां तु विध्येकवाक्यतया स्तावकत्वेन धर्मे प्रामाण्यं स्थापितम्। स च अर्थवादः बहुधा विभागः कृतः। एवमेव स्मृत्याचाराणां वेदमूलकतयाप्रामाण्यमुक्तम्।

**अर्थवादस्वरूपम्**

"प्राशस्त्यनिन्दान्यतरपरवाक्यमर्थवादः" [6] इति अर्थः - प्रयोजनं, वादः - कथनं, = प्रयोजन कथनमिति यावत्। वेदैकदेशस्य अर्थवादवाक्यस्य कथं धर्मे प्रामाण्यमिति जिज्ञासायां तेषां प्रामाण्यमुपस्थाप्यते।

विधिवाक्यानां अज्ञातार्थज्ञापकत्वेन धर्मे साक्षात्प्रामाण्यं साधितम्। किन्तु अर्थवादवाक्यानां अज्ञातार्थज्ञापकत्वं नास्तीति अप्रामाण्यमेव स्यात् – यथा "ग्रावाणः प्लवन्ते" इत्येवमादिः। तर्हि अर्थवादवाक्यानां प्रामाण्यं कथमिति चेत् – विधिवाक्यसन्निधौ श्रूयमाणस्य अर्थवादवाक्यस्य विधेययागादेः प्राशस्त्यबोधकतया अर्थवादानां प्रामाण्यम्। एवं निषेधवाक्यसन्निधौ श्रूयमाणस्य अर्थवादवाक्यस्य निषेध्य अप्राशस्त्यबोधकतया अर्थवादानां प्रामाण्यम्। अर्थवादानां यथाश्रुतार्थबोधकत्वे प्रयोजनाभावात् लक्षणया विधिनिषेधापेक्षितप्राशस्त्यनिन्दान्यतरबोधकत्वेन अर्थवादानां प्रामाण्यम्। अर्थवादवाक्यानां विधिवाक्येन सह एकवाक्यतां प्राप्य भावनान्तितस्तुतिनिन्दाविषयकप्रमाजनकत्वेन धर्माधर्मयोः प्रामाण्यम्। एतदेवप्रपञ्चितं भगवताजैमिनिना प्रथमाध्यायस्यद्वीतीयपादे अर्थवादाधिकरणे।

**यथा**

"वायव्यं श्वेतमालभेत भूतिकामः" [7] इति विधायकं वाक्यम्। वाक्यमिदं काम्यकाण्डे समाम्नातम्। अनेन वाक्येन ऐश्वर्यकामिनः वायुदेवताकः पशुः विहितः। तत्र आलम्भनं नाम बर्हिषा प्लक्षशाखया च पशोरुपस्पर्शः। पशुश्च श्वेतवर्णः। श्वेतवर्णो हि वायोरतिशयेन प्रियो भवति। तादृशं वायुदेवताकं पशुं ऐश्वर्यकामः यजमानः आलभेत संस्पृशेत्, पशोः यागार्थमुपस्पश्पर्शनं कुर्यादित्यर्थः। एवं श्वेतपश्वामलम्भनं विधाय तदुत्तरं "वायुर्वै क्षेपिष्ठादेवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" [8] इति वाक्यमाम्नातम्। शीघ्रकारिणी वायुदेवता, यजनकर्ता सा वायोरतिप्रियेण श्वेतपशुसम्बन्धिहविर्द्रव्येण वायुदेवतामेव सेवते। ततः स वायुरेवैनं यजमानं भूतिं गमयति। अत्र शीघ्रकारित्वरूपपुरस्कारेण वायुदेवतायाः स्तुतिः अवगम्यते। पूर्वस्मिन्वाक्ये वायुदेवतामुद्दिश्यपश्वालम्भनं विहितम्, तदुत्तरस्मिन्वाक्ये वायुदेवतायाः स्तुतिः क्रियते। अतः अनयोर्विधायकस्तावक वाक्ययोः कश्चन सम्बन्धः वक्तव्यः। स तु "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" [9] इति जैमनिसूत्रप्रामाण्यात् अनयोरेकवाक्यता वर्णनीया। अनेन शीघ्रकारिस्वभावतया शीघ्रफलप्रदः वायुः अस्य पशोर्देवता ततः प्रशस्तमिमं वायुदेवताकं पशुमैश्वर्यकामः आलभेत इति अस्य यागस्य प्रशस्तिः अर्थवादवाक्येन ज्ञायते। तदा झटिति विधौ प्रवृत्तिर्भवति।

**अर्थवादभेदा**

विधिशेषः, निषेधशेषश्चेति आदौ अर्थवादः द्विधाविभक्तः। तत्र "वायव्यंश्वेतमालभेत भूतिकामः" [10] इति विधिसन्निधौ श्रूयमाणः "वायुर्वै क्षेपिष्ठादेवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" [11] इत्यर्थवादः विधिशेषोर्थवादः।

एवमेव “बर्हिषि रजतं न देयम्” [12] इति निषेधसन्निधौ श्रूयमाणः “सोरोदीद्यदरो दीत्तद्रुद्रस्यरुद्रत्वम्” [13] इत्यर्थवादः निषेधशेषोर्थवादः।

अयमेव अर्थवादः प्रकारान्तरेण त्रेधा विभक्तः।
गुणवादार्थवादः, अनुवादार्थवादः, भूतार्थवादः।

**उक्तञ्च वार्तिके**

विरोधे गुणवादः स्यात् अनुवादोवधारिते।
भूतार्थवादस्तद्धानात् अर्थवादस्त्रिधा मतः॥[14] इति

विरोधे = प्रमाणान्तरेण विरोधनिश्चये सति गुणार्थवादः स्यात् इत्यर्थः।

विरोधे गुणवादः इत्यत्र उदाहरणम्, “धूम एवाग्नेर्दिवा ददृशे नार्चिः ” इति। अनेन हि अर्थवादेन दिवा धूमदर्शनमेव सम्भवति न अर्चिषः (अग्निज्वालायाः) इति उक्तं तत् प्रत्यक्षविरुद्धम्। दिवा अर्चिषः अपि दर्शनस्य सम्भवात्।

अनुवादोवधारिते इत्यत्र “अग्निर्हिमस्य भेषजम्” [15] इति वाक्यम् उदाहरणरूपेण नृसिह्माश्रमैः उद्धृतम्। किन्तु इदम् उपेक्षणीयं यतः अस्य वाक्यांशस्य मन्त्रत्वेन प्रसिद्धस्य अर्थवादत्वाभावात्। तदत्र बालप्रकाशकारैः अयम् पूर्वोक्तः उदाहरणोद्धारः अध्ययन वधुर्यात् वैचित्याद्वा इति दूषितः। अतः उदाहरणान्तरं एतैः दीयते, “वायुर्वै क्षेपिष्ठा देवता” [16] इति। वायोः तु क्षिप्रगामित्वं पूर्वम् अवधारितमेव इति अनूद्यते। ननु पूर्वोक्ते अर्थवादे वायोः क्षिप्रगामित्वं न अनूद्यते प्रत्युत वायुदेवतायाः एव। देवतायाः च विग्रहादिमत्त्वं मीमांसकेन निराक्रियते इति स्थिते कथम् अस्य अर्थवादस्य अनुवादत्वम् ? इति चेत् न मीमांसकै अपि देवतासामान्यस्य विग्रहादिमत्त्वं न निराक्रियते अपि तु यागाङ्गदेवतायाः विग्रहादिकमेव निराक्रियते। अतः पुराणप्रसिद्धायाः वायुदेवतायाः क्षिप्रगामित्वं पुराणप्रमाणेनापि विदितमेव इति अवधारितानुवादत्वम् अत्रापि। किञ्च वायुदेवतायाः क्षिप्रगामित्वं प्रमाणान्तरमेव बाधितं चेदेव अत्र विरोधे गुणवादत्वं वक्तुं शक्यते। नात्र अस्माकं वायोः क्षिप्रगामित्वे प्रमाणान्तरविरोधः सम्भवति। तेन च अस्य अर्थवादस्य अनुवादत्वं युक्तमेव।

भूतार्थवादस्तद्धानात् इत्यत्र उदाहरणम्,
“यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदस्पदम्” ॥[17]
इति।

यद्वा, दर्शपूर्णमासप्रकरणे स्थितं “य एवं विद्वान् पौर्णमासीं यजते ” [18], “य एवं विद्वानमावास्यां यजते “[19] इति विद्वद्वाक्यद्वयमपि भूतार्थवादः इत्यत्र उदाहरणं भवति। तथा चातुर्मास्यप्रकरणे “वैश्वदेवेन यजेत” इति वाक्यमपि भूतार्थवादः इत्यत्र उदाहरणं भवितुम् अर्हति।

“भूतार्थवादः तद्धानात्” इत्यत्र अन्यदपि उदाहरणं वक्तुं शक्यते, तच्च, मृताग्निहोत्रप्रकरणस्थं “अधस्तात् समिधं धारयन् अनुद्रवेत्। उपरि हि देवेभ्यो धारयति” इति वाक्यम्। अत्र च “उपरि हि देवेभ्ये धारयति “ इति अंशः सिद्धवन्निर्देशः। तदन्यथा उपपत्त्या एव दैवाग्निहोत्रे समिधः उपरिधारणं विधीयते इति अर्थवादोन्नीतविधेः इदम् उदाहरणम् इत्युक्तम्। यदि तु अत्र “हि ” शब्दस्य त्यागेन “उपरि देवेभ्यः धारयति” इत्यंशस्य विधित्वमेव अङ्गीक्रियते तर्हि इष्टापत्तिः एव।

**अर्थवादानामवान्तरभेदा**

एवमेव “निन्दा, प्रशंसा, परकृति, पुराकल्पः” रूपेण अर्थवादानामवान्तर भेदाः उपलभ्यन्ते। “असत्रं वा एतद्यदछन्दोमम्” [20] इत्यादयः निन्दार्थवादाः “शोभतेऽस्यमुखं य एवं वेद” इत्यादयः प्रशंसार्थवादः। “अग्निर्वा अकामयत” [21] इत्यादयः पराकृत्यर्थवादाः। “तमशपद्धियाधियात्वा वध्यासुः” [22] इत्यादयः पुराकल्पार्थवादाः।

विशेषेण “मीमांसाबालप्रकशा” इत्याख्ये ग्रन्थे अर्थवादानां अष्टात्रिंशद्भेदाः प्रदर्शिताः।

**अर्थवादानां प्रयोजननिरूपणम्**

अर्थवादवाक्यानां प्रयोजनं तु नितरां विद्यते एव। यतो हि विधिसन्निधौ श्रूयमाणानि अर्थवादवाक्यानि विधेयस्य प्राशस्त्यबोधकतया पुरुषस्य प्रवर्तने सहायकानि भवन्ति। एवमेव निषेधसन्निधौ श्रूयमाणानि अर्थवादवाक्यानि निषेधस्य अप्राशस्त्यबोधकतया पुरुषस्य निर्वर्तने सहायकानि भवन्ति।

केचन अर्थवादवाक्यानि फलनिरूपणेऽपि समर्थानि भवन्ति। यथा - रात्रिसत्र यागे फलस्य अश्रवणात् अर्थवादवाक्येनैव फलनिर्णयो भवति। “प्रतितिष्ठन्ति ह वा य एता रत्रीरुपयन्ति” इति श्रवणात् अस्य यागस्य प्रतिष्ठाकाम रूप फलं निर्णीतम्।

एवमेव सन्दिग्धस्थलेऽपि अर्थवादवाक्यानि सहायकानि भवन्ति। यथा – “अक्ताश्शर्करा उपदधाति” इत्यत्र अञ्जनसाधनंकिमिति

सन्देहः जातः तत्सन्निधौ श्रूयमाणेन “तेजोवा आज्यम्” इत्यर्थवादवाक्येन अञ्जनसाधनम् आज्यमिति ज्ञायते।

**अन्त्यटिप्पणी**

1. जै. न्या. श्लो.सं - 11, 12
2. जै. सू. - 1-1-2
3. मी. न्या. पृ.सं - 2
4. अ. सं. पृ.सं - 45
5. तै. सं - 1-5-9
6. अ. सं. पृ.सं - 245
7. तै. सं - 2-1-1
8. तै. सं - 2-1-1
9. जै. सू - 1-2-7
10. तै. सं - 2-1-1
11. तै. सं - 2-1-1
12. तै. सं - 1-5-1
13. तै. सं - 1-5-1
14. अ. सं पृ.सं - 250
15. तै. सं - 7-4-18
16. तै. सं - 2-1-1
17. अमरकोशः - 1-1-6
18. तै. सं - 1-6-9
19. तै. सं - 1-6-9
20. तै. सं - 7-3-8
21. तै. ब्रा - 3-1-3
22. तै. सं - 2-6-6

**परिशीलितग्रन्थसूची**


जैमिनीयन्यायमाला - चौखम्बा संस्कृतसंस्थान, वारणासी

मीमासादर्शनम् - तारा पब्लिकेशन्स् - वारणासी

मीमांसान्यायप्रकाशः - चौखम्बा संस्कृतसंस्थान, वारणासी

अर्थसंग्रहः - चौखम्बा विद्याभवन, वारणासी

श्लोकवार्तिकम् - रत्ना पब्लिकेशन्स् - वारणासी

दर्शनशास्त्रस्येतिहासः - चौखम्बा सुरभारती प्रकाशन, वारणासी

मीमांसाबालप्रकाशः - चौखम्बा संस्कृतसीरीज् आफीस्, वारणासी

तैत्तिरीयसंहिता - गोमठं पब्लिकेशन्स् - मैसूरु

तैत्तिरीयब्राह्मणम् - गोमठं पब्लिकेशन्स् – मैसूरु